# Bhadrapadamasakrite Shiva Stuti Masa6

# भाद्रपदमासकृते शिवस्तुतिः मास ६

## Document Information

Text title : Bhadrapadamasakrite Shiva Stuti Masa 6

File name : bhAdrapadamAsakRRiteshivastutiHmAsa6.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 19 bhAdrapadArchanam | 59-70||

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2024

*sanskritdocuments.org*

# भाद्रपदमासकृते शिवस्तुतिः मास ६

(शिवरहस्यान्तर्गते महादेवाख्ये)

- शिवगौरीसंवादे -

सुपर्वगन्धर्वसुपूजिताय
विसर्ग निरर्ग सर्गादिविधानकारिणे ।
भर्गाय शर्वाय च सर्वगाय
नमो नमस्तेऽन्तकगर्वहारिणे ॥ ५९॥

गुहवहभोजन मौलिमणिप्रिय
शङ्कर पुरहर शं कुरु मे ।
तुङ्गवृषाधिपलिङ्ग सदोज्वल
भव भवभयहर कुरु करुणाम् ॥ ६०॥

कालकाल सुतमालकण्ठ
ज्वालकील गरलाशन शम्भो ।
व्यालमाल सुकपालकपाणे
कोलदन्तहरणाय नमस्ते ॥ ६१॥

भालनेत्र सुपवित्रवराङ्गो(ङ्ग)-
द्धारपात्र धृतगाङ्गरयश्च ।
पद्ममित्रकृतनेत्र कलत्रा-
धीङ्गपात्र परिपाहि गिरित्र ॥ ६२॥

अण्ड खण्डविधिमुण्डवराण्डो-
द्धाण्डषण्डविधिमुण्डकरण्ड ।
कुण्डलीशकृतकुण्डलगण्ड-
खाण्डकोशकलिताखिलपाल ॥ ६३॥

एवं स्तुवन्भाद्रपदे भद्राणि लभते नरः ।

दत्वा शाम्भववर्याणां कृष्णगोमिथुनं शिवे ॥ ६४॥

सदक्षिणं सवत्सं च हुत्वा होमं विधानतः ।
मासं नक्ताशनो भूयाद्भवभक्तो जितेन्द्रियः ॥ ६५॥

मासान्ते भाद्रपौर्णम्यामेवं पूज्य महेश्वरम् ।
स्वयं भुञ्जीत सहितो बान्धवैर्बन्धमुक्तये ॥ ६६॥

एवं भाद्रपदे मासे सम्पूज्य परमेश्वरम् ।
यात्यन्ते वंशसाहस्रैर्वैर्यानैर्मनोहरैः ॥ ६७॥

गीतवादित्रनिनदैर्विरजोऽम्बरवाससा ।
गन्धचन्दनमाल्यादि दिव्यस्रगनुलेपनः ॥ ६८॥

दोधूयमानश्चमरैर्वीजितो व्यजनादिभिः ।
विहायैव पदादूर्ध्वं याति मत्सदनं शिवे ॥ ६९॥

तत्र मे गणपैः सार्धं मोदते कालमक्षयम् ॥ ७०॥

॥ इति शिवरहस्यान्तर्गते ईश्वरप्रोक्तं भाद्रपदमासकृते शिवस्तुतिः सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् । महादेवाख्यः एकादशमांशः । अध्यायः १९ भाद्रपदार्चनम् । ५९-७० ॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 19 bhAdrapadArchanam . 59-70..

Notes:

Śiva शिव advises to Devī देवी; the ŚivaStutiḥ शिवस्तुतिः for the māsa मास while detailing about His Worship during the Bhādrapada māsa भाद्रपद मास. He mentions about conducting Homam होमम् during the month, and worshiping Maheśvara महेश्वर during Bhādrapada Pūrṇimā भाद्रपद पूर्णिमा.

The Bhādrapadamāsakṛte ŚivaŚatāṣṭanāmaStotram भाद्रपदमासकृते शिवशताष्टनामस्तोत्रम् and the Bhādrapadamāsakṛte ŚivaŚatāṣṭaNāmāvaliḥ भाद्रपदमासकृते शिवशताष्टनामावलिः comprising of 108 Names १०८ नामानि of Śiva शिव, derived from the same can be accessed from one of the links provided below. The count from the source text comes to less than 108 though. Perhaps there are/were meant to be more Śloka-s.

More details about worshiping Śiva शिव during individual Māsa मास are given in Chapters 13-25.

Selected Śloka-s श्लोकाः from Chapter 19 are presented on this page.

Proofread by Ruma Dewan

---

*Bhadrapadamasakrite Shiva Stuti Masa6*

pdf was typeset on November 2, 2024

Please send corrections to *sanskrit@cheerful.com*